This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क. 32

॥श्रीगणेशशारदागुरुपत्कंजेभ्योनमः॥श्रीत्रिपुरसुंदर्यैनमः॥अ
थैकादशीनिर्णयंव्याख्यास्यामः॥प्रणम्यलक्ष्मीपतिमादिदेवंप्रमा
णसारंमुनिवाक्यमूलं॥एकादशीनिर्णयमज्ञबोधंविद्वज्जनानं
दकरंप्रवक्ष्ये॥१॥धर्मविचारोनिर्णयइत्येकेतत्रादौधर्मलक्षणं॥
मनुराह॥वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां॥आचारश्चै
वसाधूनांआत्मनस्तुष्टिरेवच॥२॥स्मृत्यंतरे॥वेदस्मृतिःसदाचा
रस्वस्यचप्रियमात्मनः॥एतच्चतुष्टयंप्राहुःसाक्षाद्धर्मस्यलक्षणं
॥३॥तत्त्वनिर्णयफलोविवादः॥तदुक्तंतार्किकरक्षायां॥अथप्र
माणतर्काभ्यांसाधनापेक्षसंयुता॥वीतरागकथावादस्तत्फलंत
त्त्वनिर्णयः॥४॥अत्रप्रमाणापेक्षितत्वात्प्रमाणमुच्यतेप्रमाणंवे
दादितदाह॥हारितः॥वेदाःप्रमाणंस्मृतयःप्रमाणंधर्मार्थयुक्तं
वचनंप्रमाणं॥यस्यप्रमाणंनभवेत्प्रमाणंकस्तस्यकुर्याद्वचनंप्र
माणं॥५॥अंगिराः॥नयस्यवेदानचधर्मशास्त्रंयंनद्व

Acc. No: ~~663~~ M1066
Title: ~~एकादशी निर्णय~~
Subject: Ritual
पत्र 1-14

K K S U LIBRARY
RAMTEK
441 106
M1066
Dist. Nagpur

1

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यंहि भवेत्प्रमाणं ॥ सोधर्मकृत्नुदृष्टिहतोदुरात्मा नात्मापितस्येहभ
वेत्प्रमाणं ॥ ६ ॥ तर्कोविचारः सत्यस्यस्थापने ॥ तत्रसंदेहे विशेषवचनं प्रमाणं ॥ तदुक्तं स्मृतिसंग्रहे ॥ श्रुतिस्मृतिपुराणानां विरोधेषुपर
स्परं ॥ पूर्वंपूर्वं बलीयःस्यादितिन्यायविदो विदुरिति ॥ ७ ॥ अथैकाद
शी नित्याकाम्याचस्यात् ॥ अकरणेदोषश्रवणान्नित्या ॥ कृते चम
हाफलश्रवणात्काम्याच ॥ तदुक्तं कात्यायनेन ॥ अष्टवर्षाधिकोम
र्त्योह्यपूर्णाशीतिवत्सरः ॥ एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥ ८५
तथा ॥ अन्नमाश्रित्यतिष्ठंतिपापान्येकादशीदिने ॥ अतस्तत्रैवयोभुंक्ते
सभुंक्तेकिल्बिषंनरः ॥ ९ ॥ महाफलंतु ॥ एकादशीसमंकिंचित्पापत्रा
णंनविद्यते ॥ स्वर्गमोक्षप्रदाह्येषापुत्रराज्यप्रदायिनी ॥ १० ॥ इत्यादीनि
बहून्यपिसंति ॥ परंतुविस्तरभयान्नोक्तानि ॥ यथासंभवंविषयभेद
ज्ञापनार्थमेकैकवचनमुच्यते ॥ इतऊर्ध्वंसर्वत्रैवज्ञातव्यं ॥ यथानेक
कृतनिबंधविस्तरनिर्णयेसतिकिमनेनाल्पेनातिप्रयोजनमुच्यते ॥

१

(2)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहूनांतुनिबंधानांविस्तरेनिर्णयेसति॥अल्पस्थेपिविशेषोत्रविज्ञेयो
विबुधैर्जनैः॥११॥अथैकादशीद्विधाशुद्धाविद्धाचेति॥शुद्धापुनस्त्रिधासमा
न्यूनाधिकाचेति॥तथाविद्धापिसमान्यूनाधिकाचेति॥त्रिधाएवंषट्प्र
कारैपिप्रत्येकंद्वादश्याः॥समान्यूनताधिक्ययोगात्त्रिधास्यात्॥एवमे
वएकादश्या अष्टादशभेदाःभवंति॥तेच॥श्रुतिस्मृतिपुराणज्योतिः
शास्त्रेषुयथानिर्णीतास्तथाग्रेवक्ष्यंते॥तत्रतावद्विज्ञानेश्वरानंतभट्टवि
श्वरूपबोपदेवपंडितैरुक्तास्तन्मूलाःसंग्रहश्लोकाउच्यते॥तत्रविज्ञाने
श्वरः॥शुद्धामिश्रादशम्याकेचिदपिचततोद्वैधमेकादशीयंप्रत्येकंच
त्रिधासोपुनरपिसमतान्यूनताधिक्ययोगात्॥पक्षाःप्रत्येकभिन्नाःपुन
रपिषडमीद्वादशीन्यूनताद्यैःसंबंधादेवमष्टादशखलुमिलिताःकल्प
नाःसंभवंति॥१२॥संपूर्णैकादशीयानभवतिपरतःसासमावाधि
कावान्यूनानैवास्तिवाच्यंव्रजतिहरिदिनंद्वादशीचापिचोर्ध्वं॥स
र्वेकुर्युःप॰ रस्तादुपवसनमथद्वादशीनोर्ध्वमेतिप्रव्राडत्रद्वितीया

२

मुपवस ॰ नज्ननाःपूर्वमन्येचसर्वे॥१४॥प्रव्राट्सन्यासी॥अन्येगृहस्था
दयः॥य द्यैषापूर्वविद्धाभवृतिचपरतःसासमावा॥समावासर्वैकुर्यु
र्द्वितीयामथहरिद्दिवसःपूर्वविद्धोपिकुर्यात॥द्वादश्यांसात्रिसंस्पृक्
यदिभवतिपरंमोक्षिणःपार मन्येयद्वाविद्धानचोर्ध्वंपरमुपरिभ
वेत्तत्रसर्वेपरस्तात॥१५॥पूर्वविद्धाथवासानभवतिपरतोद्वादशी
नापिचोर्ध्वंकुर्यात्तत्रोपरिष्टान्मुनिजननिकरःपूर्वमन्येचसर्वे॥
विद्धंप्रातर्दशम्याहरिदिनमथचद्वादशीरात्रिशेषेसर्वेपूर्वेतदा
व६ नीमुपेसनजनाःप्रीतयेकेशवस्य॥१६॥तथाचानंतभट्टः॥श्लो
कद्वयंपूर्ववत॥काम्यत्वेकादशीयायदिकथमपिचेत्तत्फलार्थेव
शुद्धाविद्धाभेदेषुमध्येयदिभवतितदायेनकेनापिदृष्या॥याज्या
सेकादशीस्यादुपवसनविधौद्वादशीकेवलास्याद्दियेतत्सर्वमु
क्तंभवतियदिसमावृद्धियुक्ताथवासा॥१७॥विद्धेकादश्युपोष्या
यदितुपरदिनेदृश्यतेनैवकिंचित्सर्वैरेवाश्रमस्थैर्गृहवन्तियति २

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिः सर्वलोकस्तथान्यैः॥साचेत्किंचित्परस्मिन्नूभवतिपरदिनेसर्वदा
सैवकार्यासर्वैरेवद्वितीयासकलमुनिकृतोनिर्णयोनियतायां॥१८॥
तथाविश्वरूपः॥शुद्धात्रेधातथाविद्धाभेदेन्यूनसमाधिके॥प्रत्येकंच
पुनस्त्रेधाद्वादशधान्यूनसमाधिके॥१९॥आद्यासुषट्सुपूर्वैवव्यवस्था
नंतरंद्वयोः॥गृहमेधिनीयतीनांचनवमीचोत्तरामता॥२०॥चिद्धत्रि
केषुपूर्वैवव्यवस्थानंतरंद्वयोः॥अपरेहनिशेषासुःसप्तम्यांचाव्य
वस्थितिः॥२१॥तथाचोक्तंबोपदेवपंडितैः॥नवधैकादशीशुद्धा
हीनाहीनाधिकापरा॥नवधैकादशीविद्धाचात्रनिर्णयसंग्रहः॥
॥२१॥शुद्धषट्केगणेविद्धत्रिकेपूर्वाव्यवस्थिता॥द्वयोर्द्वयोःसप्तमे
चशेषेष्वेकादशीपरेति॥२२॥इत्यादिभिःसामान्येननिर्णीतं॥अ
थात्रभेदेषुपरस्परमनेकवाक्यविरोधजसंदेहपरिहारार्थंविषय
भेदेनविशेषनिर्णयमुच्यते॥तत्रसूर्योदयपर्यंतस्थायित्वंसमत्वं
ततोन्यूनत्वेन्यूनत्वंअधिकत्वेधिकत्वंबोध्यं॥तदुक्तंज्योतिःशास्त्रे

६

३

पूर्णानंदा च भद्रा च तद्दिने षष्ठिभिः समा ॥ ततोन्यूने च न्यूना स्यात्सृष्ट्याधि
केप्यधिका मता ॥ २४ ॥ तद्दिनं ग्रहणं चात्र दिनांतरव्याप्त्ययर्थं सुद्धायां चे
त्किंचित् ॥ तथा षष्ठिघटिकाभिर्निरंतरं साम्यं ॥ तत्काल क्षयो
वृद्धी ॥ निरंतरं परम ह्रासवृद्धी च ॥ कदाचिदेवं संभवति न तु सर्वदा ॥
तदुक्तं सिद्धांते ॥ षष्ठे निरंतरं साम्यं तत्काले वृद्धि संक्षयो ॥ निरंतरं म
हा वृद्धिर्महा ह्रासः क्वचिद्भवेत् ॥ २५ ॥ तत्र सुद्धत्वं त्रिविधं ॥ एकं स्कंद
पुराणोक्तं प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः ॥ संपूर्णा इति
विख्याता हरिवासरवर्जिता ॥ २६ ॥ एतदेकादशीव्यतिरिक्तविषयं
द्वितीयं ॥ गरुडपुराणोक्तं ॥ आदित्योदयवेलायाः प्राक्मुहूर्तद्वया
न्विता ॥ संपूर्णा इति विख्याता विद्धान्या परिकीर्तिता ॥ २७ ॥ तृती
यं स्मृत्युक्तं ॥ अरुणोदयवेलायां या स्तोकापि तिथिर्भवेत् ॥ संपूर्णे
य एवं मंतव्या प्रभूता नोदयं विना ॥ २८ ॥ इति तथा संभवज्ञेयं ॥ अथ

३

(८)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुद्धसमास्तुद्वन्यूनाद्वादशीसमादिषञ्जेदेषुसर्वैर्गृहीभिर्यतिभिरपि
पूर्वैवोपोष्येति केचिदाहुः॥ तदुक्तं स्कंदपुराणे॥ शुद्धायदासमाहीनोसमाक्षीणाधिकोत्तरा॥ एकादशीमुपवसेन्नशुद्धांवैष्णवीमि
ति॥२९॥ वैष्णवीद्वादशी अत्रषड्भेदेष्वपिद्वादश्यधिकत्वेपरैवमा
न्येत्यन्ये॥ तथोक्तंभविष्ये॥ एकादशीत्वहोरात्रंद्वादशीचकलाधिका॥
त्रयोदश्यांयदाप्रातरुपोष्याद्वादशीतदा॥३०॥ इतिविरोधेसम
च्यते॥ काम्यनित्यभेदेनव्यवस्थितत्वान्नविरोधः॥ अथवाश्रुतिस्मृ
तिपुराणानांविरोधेषुपरस्परमितिन्यायेनविशेषबलाद्विशेषः
कार्यः॥ तथोक्तंस्मृतौ॥ एकादशींविनामूढैर्यैः कृतंद्वादशीव्रतं॥ पा
रणंचत्रयोदश्यांतैः कृतः कोटिगोवधः॥३१॥ इतिविशेषणयुतामा
न्येति॥ अस्यायमर्थः॥ यत्रोपवासेएकादशीनास्तिपारणेद्वादशी
नास्तितद्योगद्वयाभावात्पूर्वाग्राह्या॥ नोत्तरेति॥ यत्तुसमाक्षीणा
धिकोत्तरेत्युक्तंतत्तुषष्टिघटिकाभ्योन्यूनत्वेषट्पंचाशताधिकत्वे

(७)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञेयमित्यभिप्रायः॥अतस्तत्रषट्भेदेषुसमन्यूनगतभेदचतुष्टयेपू
र्वा॥अधिकगतभेदद्वयेपराकार्यैतिनकश्चिद्विरोधइतिसिद्धं॥न
नुद्वादशीपारणेनास्ति॥यद्येकादशीउपवसेनास्ति॥तद्वायोगद्व
याभावात्पूर्वैवस्यादितिचेन्नैवं॥द्वादशीवृद्धौसत्यदृष्टैकादशी
वृद्धिरस्त्येव॥तिथ्यादौतुभवेद्यावन्ह्रासवृद्धिपरेहनि॥तावान्ग्राह्यः

१०	र	५६	१०	र	५६	१०	र	५६	१०	र	५६	१०	र	५६	१०	र	५६	सपूर्वे
११	च	६०	११	चं	६०	११	च	५९	११	च	५९	११	च	६०	११	च	५९	पुरदृ
१२	मं	६०	१२	मं	[illegible]	१२	मं	६०	१२	मं	५६	१२	मं	६०	१२	मं	६०	ष्टेपि
१३	बु	५५	१३	बु	५५	१३	बु	५६	१२	बु	६०	१२	बु	१	१३	बु	१	स्वक
																		र्मणी

तिस्मृस्कले:॥३२॥तथाचोक्तंगरुडपुराणे॥पूर्णाभवेद्यदानंदाभ
द्राचैवविवर्द्धते॥तदोपोष्यातुभद्रास्यात्तिथिवृद्धिःप्रशस्यते॥३३॥
पुराणांतरेपि॥तथारुणोदयेब्रह्मन्दशमीदृश्यतेयदि॥द्वादश्येका
दशीवृद्धौपरापूर्वाक्षयेसदा॥३४॥तथा॥द्वादश्यामुपवासोत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादश्यामेवपारणं॥ तत्रक्रतुशतंपुण्यंविहितंमुनिसत्तमैरिति॥३५॥
यत्तुद्वादश्यधिकत्वेपिपूर्वाग्राह्येतिकैश्चिदुक्तंतत्तुषट्पंचाशांधि ता२
कत्वेषष्ठेर्न्यूनत्वेसंभवति॥ तदापूर्वैवस्यान्नान्यत्र॥ तदुक्तंब्रह्मांडे॥
अरुणोदयवेलायांस्याद्दशादिदिनत्रयं॥ तदैवोपवसेन्नंदांभ
द्राधिक्येपिमानवः॥३६॥ तथाभविष्ये॥ एकादशींपरित्यज्यद्वाद
शींसमुपोषयेत्॥ आजन्मसुकृतंहंतित्रयोदश्यांतुपारणमिति॥३७॥
षड्भेदनिर्णये॥ अथयस्तुद्व्यधिकाद्वादशीसमाद्वादश्यधिकाच
भेदद्वयेपरेन्हिएकादशीपारणेद्वादशीयोगद्वयसद्भावात्॥ सर्वैः
परैवोपोष्या॥ तदाहमनुः॥ संपूर्णैकादशीयत्रप्रभातेपुनरेवसा॥
तत्रोपोष्यापराःपुण्यापरतोद्वादशीयदि॥३८॥ नन्वत्रसंपूर्णैका
दशीयत्रप्रभातेपुनरेवसा॥ पूर्वामुपवसेत्कामीनिष्कामस्तूत्तरां
सदेति॥३९॥ कामीगृहस्थः॥ निष्कामोयतिः॥ तथाच॥ निष्का
मस्तुनरःकुर्यादुत्तरैकादशींसदा॥ सकामस्तुसदापूर्वामिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बौद्धायनोऽब्रवीत्॥४०॥उपोष्येद्वेतिथीतत्रविष्णुप्रीणनतत्परैः॥तत्रो
त्तरांयतिःकुर्यात्पूर्वामुपवसेद्गृही॥४१॥इतिपूर्वांगृहीकुर्याद्यति
स्तूत्तरामिति॥व्यवस्थाकथंनस्यादितिचेन्मैवं॥एतत्काम्यपरंज्ञे
यं॥नित्यत्वेतुपरैवकार्या॥अथवापारणायोग्यद्वादश्यासत्वे
दशमीवेधविषयत्वात्परैवकार्येतियुक्तं तथोक्तंवाराहपुराणे॥
६न एकादशीविष्णुनाचैद्द्वादशीपरतःस्थिता॥उपोष्याद्वादशीमिश्रा
यदीच्छेत्परमंपदं॥५२॥विष्णुर्द्वादशीसत्तार्थेतृतीयापुराणात्
रेपि॥नंदापूर्णापुनःप्रातःकालेभद्राकलापिचेत्॥गृहस्थोपिपरां
कुर्यात्पूर्वांनोपवसेत्तदा॥४३॥रुद्रेणद्वादशीयोगादितियुग्मवि
धानाच्च॥नारदीये॥संपूर्णैकादशीयत्रप्रभातेपुनरेवसा॥त
त्रोपोष्याद्वितीयातुपुत्रपौत्रप्रवर्द्धिनीति॥४४॥वेधस्तु॥अरु
णोदयवेलायांदशमीयत्रसंगता॥तदातुदशमीशल्यसंज्ञा
ज्यविष्णुतत्परैः॥४५॥अरुणोदयेयदापूर्णानंदाचेवविवर्द्धने॥ ५

८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०	र	५६
११	चं	६०
११	मं	१
१२	बु	५८

त्याज्यापूर्वासशल्यासाग्राग्राह्यासैवचान्यथासदा॥४६॥अतएवोक्तंस
मुच्चये॥तिथिःसशल्यापरिवर्जनीयाधर्मार्थकामेषुबुधैर्मनुष्यैः॥
विहीनशल्यापरिवर्जनीयायथाग्रतोवृद्धिमुपैतिपक्षः॥४७॥इ
तिसप्तमनवमभेदनिर्णयः॥अथशुद्धाधिकाद्वादशीन्यूनापि
परेन्हिएकादशीसद्भावात्दशमीवेधविषयत्वाच्चपराकार्या॥
तदुक्तंपुराणेषु॥द्वादशीमिश्रितांकार्यासदैवैकादशीतिथिः॥
द्वादशीचत्रयोदश्यांविद्यतेवानवाविभो॥४८॥अन्यच्च॥एका
दशीमुपोष्येतद्वादशीमथवापिवा॥मिश्रितांवाप्रकुर्वीतनद
शम्यायुतांक्वचित्॥४९॥ननु॥पारणंतुत्रयोदश्यांनिष्कामा
नांविमुक्तिदं॥कुलच्छेदकरंतत्तुगृहीणांनात्रसंशयः॥५०॥
इतिपारणार्हद्वादश्यभावेगृहस्थानांपूर्वाग्राह्येतिचेन्नैवं॥काम्य
परमेतत्॥विद्धाभेदविषयंवा॥अथवाएकादशीपरेन्हिसद्भा
वात्द्वादशींविनापित्रयोदशीपारणाविधायकविशेषवाक्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलात्पैरेवयुक्ता॥तदुक्तंनारदीये॥एकादशीकलामात्राद्वादश्यांच
यदाभवेत्॥पारणंचप्रकर्तव्यंत्रयोदश्यांतदानरैः॥५१॥पुराणां
तरेपि॥एकादश्यष्टमीषष्ठीतृतीयाचत्रयोदशी॥पूर्वविद्धापिक
र्तव्यायदिनस्यात्परेहनि॥५२॥तथाचस्मृतौ॥एकादश्यास्तुरीय
स्तुपादस्यादितिवक्ष्यमाणत्वात्तथा॥खर्वोदर्पस्तथाहिंसात्रिवि
धंतिथिलक्षणं॥खर्वदर्पौपरौपूज्यौहिंसास्यात्पूर्वकालिकी॥५३॥
ननु॥यथाद्वादशमासेषुवृद्धिमासोमलिम्लुचः॥तथातिथिष्वहो
रात्राधिकाचमलिम्लुचा॥५४॥तथा॥महाहानिकरीह्येषाद्वा
दशीलंघितानृणां॥करोतिधर्महरणमस्नातेवसरस्वती॥५५॥
स्नानंकृतंयस्यांसास्नातानस्नाताअस्नातासरस्वतीयथाधर्म
हरणंकरोतितथाद्वादशीलंघितामहाहानिंकरोति॥द्वादशी
न्यूनत्वेधिकतिथिस्त्याज्येतिचेन्नैवं॥एकादशीक्षयपक्षेद्वादशी
लंघनदोषविषयत्वात्॥तथाच॥यदामलिम्लुचःपूर्वोदैवोमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोत्तथोत्तरः॥ग्राह्यातिथिस्तथापूर्वाविद्धोग्राह्यास्तथोत्तरेति॥पूर्वा
साचद्विविधाएकेएकदिनेसंभवति अपरेदिनांतरेपीतितत्रदि
नांतरसंभवेषुसर्वेषुपरैवकार्याएकदिनेषुव्यवस्था॥इतिश्रीम
न्मुरारिसूनुधरणीभट्टविरचितएकादशीनिर्णयसारेशुद्धाभे
दनिर्णयः॥अथविद्धाभेदेषुनिर्णयउच्यते॥तत्रविद्धसमाद्वाद
शीसमाविद्धसमाद्वादशीन्यूना चेतिभेदद्वयेपूर्वागृहस्थैरुपोष्याय
यतिभिस्तूत्तरेति॥व्यवस्थानिष्कामस्तुनरःकुर्यादिति॥उपो
ष्येद्वेतिथीतत्रैयादिपूर्वोक्तत्वात्॥तथोक्तंस्कंदपुराणेपि॥शुद्धैव
द्वादशीराजन्नुपोष्यामोक्षकांक्षिभिः॥सकामैर्गृहिभिःपूर्वावि
द्धापीतिविनिश्चयः॥१॥पुराणांतरेपि॥त्रयोदश्यांनलभ्येतद्वाद
शीयदिकिंचन॥उपोष्यैकादशीतत्रदशम्यामिश्रितापिवा॥२॥
पुराणसमुच्चये॥द्वादशीस्वल्पमात्रापियदिनस्यात्परेहनि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशम्यामिश्रिताकार्यामहापातकनाशिनी॥३॥ननुअरुणोदयम
रभ्यप्रोक्तोदशमीवेधःकथंनस्यादितिचेन्नैवं॥दशमीवेधोत्र
यतिविषयोनतुगृहि विषयः॥पारणंतुत्रयोदश्यांनिष्कामानां॥
विमुक्तिदमितिपूर्वोक्तत्वात्॥अन्यत्र॥पारणंतुत्रयोदश्यांनक
र्तव्यंफलार्थिभिः॥ [illegible] ॥

KKSU LIBRARY RAMTEK 441 106 Dist Nagpur M1066

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=17.10.20 12:57
,TRANSFERRED=2020/10/17 at 12:59:22
,PAGES=14
,TYPE=STD
,NAME=S0004082
,Book Name=M-1066-EKADASHI NIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection